# 84 - चतुरशीतितम दशकम्
# समन्तक पञ्चक यात्रा

क्वचिदथ तपनोप राग काले पुरि निदधत् कृतवर्म कामसूनू ।
यदुकुल महिला वृतः सुतीर्थं समुपगतोऽसि समन्त पञ्चकाख्यम् ॥84-1॥

बहुतर जनता हिताय तत्र त्वमपि पुनन् विनिमज्य तीर्थ तोयम् ।
द्विज गण परिमुक्त वित्तराशिः सममिलथाः कुरु पाण्डवादि मित्रैः ॥84-2॥

तव खलु दयिता जनैः समेता द्रुपद सुता त्वयि गाढ भक्ति भारा ।
तदुदित भव दाहृति प्रकारैः अति मुमुदे सम मन्य भामिनीभिः ॥84-3॥

तदनु च भगवन् निरीक्ष्य गोपान् अति कुतुका दुपगम्य मानयित्वा।
चिरतर विरहातु राङ्गरेखाः पशुप वधूः सरसं त्व मन्व यासीः ॥84-4॥

सपदि च भव दीक्षणोत्सवेन प्रमुषितमान हृदां नितम्बिनीनाम् ।
अति रस परिमुक्त कञ्चुलीके परिचय हृद्यतरे कुचे न्यलैषीः ॥84-5॥

रिपुजन कलहैः पुनः पुनर् मे समुपगतै रियती विलम्बनाऽभूत् ।
इतिकृत परिरम्भणे त्वयि द्राक् अतिविवशा खलु राधिका निलिल्ये ॥84-6॥

अपगत विरह व्यथास् तदा ताः रहसि विधाय ददाथ तत्त्व बोधम् ।
परम सुख चिदात्मकोऽह मात्मेति उदयतु वः स्फुट मेव चेतसीति ॥84-7॥

सुख रस परिमिश्रितो वियोगः किमपि पुराऽभव दुद्धवोपदेशैः ।
समभव दमुतः परं तु तासां परम सुखैक्य मयी भवद् विचिन्ता ॥84-8॥

मुनि वर निवहैस् तवाथ पित्रा दुरित शमाय शुभानि पृच्छ्यमानैः ।
त्वयि सति किमिदं शुभान्तरै रिति उरुहसितैरपि याजितस् तदाऽसौ ॥84-9॥

सुमहति यजने वितायमाने प्रमुदित मित्र जने सहैव गोपाः ।
यदुजन महितास् त्रिमास मात्रं भव दनुषङ्ग रसं पुरेव भेजु :॥84-10॥

व्यपगम समये समेत्य राधां दृढ मुप गूह्य निरीक्ष्य वीत खेदाम् ।
प्रमुदित हृदयः पुरं प्रयातः पवनपुरेश्वर पाहि मां गदेभ्यः ॥॥84-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥